पू. द्वारकापीठ-'श्री'-चरणैः जगद्गुरु श्री-शङ्कराचार्यैः डाकोर-क्षेत्रस्थे शारदामठे नवनिर्मित श्रीयन्त्ररूपं कमलाकारं मेरुपृष्ठं श्रीशारदाम्बा-मन्दिरम्। अस्य प्रतिष्ठापनोत्सवः ९ मार्च १९७० दिने सुसंपन्नः। तत्र पुरी-ज्योतिर्मठ-शंकराचार्य 'श्री'चरणाः गुजरातराज्यपालः श्रीमान् नारायणः तथा कुम्भमेलकसदृशी लक्षलक्षभक्तानां महती यात्रा संमिलिता आसीत्। गच्छन्तु सर्वे शारदोपासकाः तत्र दर्शनार्थम्।

* * * * * * * * * * * * * * * * * * * * * * * *


# शारदा

सौर १ चैत्र १८९२

२२ मार्च १९७०


CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# लॉटरी...लॉटरी...लॉटरी ! धनं धनं धनम् !!

अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः ।

(ऋग्वेद १०–३४–१३)

अयं कृषिप्रशंसापरः द्यूतनिन्दापरः संदेशः प्राचीनः । ऋग्वेदस्थः । अयं भारतीयः जीवनादर्शः । आर्याणाम् आदर्शा जीवनपद्धतिः । इयम् एव सत्त्वप्रधाना संस्कृतिः । अत्रैव प्रतिष्ठा श्रमस्य । संदेशः कर्मयोगस्य । सोपानः सर्वोत्कर्षस्य । आश्वासनम् अभ्युदयस्य । निश्चयः निःश्रेयसः ।

परम् इदं केषां कृते? आधुनिक-भारतस्य कृते? नहि नहि । शान्तं पापम् । श्रूयते नु दुन्दुभिः सर्वत्र समाजवादस्य? श्रूयताम् । स्मर्यताम् । प्राप्तः समाजवादः । इयम् अभिनवा रमा इन्दिरा तस्य गायत्री । 'लॉटरी' संज्ञकं दिव्यं द्यूतं तस्य वाहनम् । अनेन गतं चेत् कुत्रचित् अॅम्बॅसडरयानं, कुत्रचित् गृहनिर्माणार्थं भूमिः लप्स्यते । गच्छता मार्गेण 'तत्र गावः कितव तत्र जाया' ...! अत्र मद्यं, तत्र मदिराक्षी...! सर्वं सर्वं लभ्यम् । केवलं रूप्यकमुद्रामात्रं धन व्ययीक्रियताम् । स्वीयं न भवति चेत् परकीयम् अपहृत्य क्रेतव्या द्यूतपत्रिका । न प्रयोजनं व्यवसायस्य । नावश्यकी उद्यमशीलता । अलं विद्याभ्यासेन । इयं कामधेनुः सर्वस्वदात्री । लॉटरी... लॉटरी... लॉटरी । धनं... धनं... धनम् । स्वप्नान् अपि 'लॉटरी'मयान् पश्यत ।

पुण्यपत्तने मुम्बईनगरे द्यूतमत्तान् पौरजनान् साक्षात्कृत्य धिक् तं समाजवाद-साम्राज्यम् इति स्वाभाविकीं प्रतिक्रियां वयोवृद्धाः तपोवृद्धाः श्रावयन्ति । परं कस्तत्र श्रोता? गतं तेषां ज्ञानवृद्धानां युगम् । समाप्तः कालः उद्योगिनां पुरुषसिंहानां लक्ष्मीसमुपासकानाम् ।

महात्मा गान्धी । युगपुरुषः । सांप्रतिकं दैवतं राज्यशासकानाम् । 'रघुपति राघव राजा राम...' इति प्रार्थनां स्मारं स्मारं 'हे राम..' इति जपं जपन् सः रामलोकं प्राप्तः । 'राम-राज्य-स्थापना' स्वप्नचित्रं

(तृतीय मलपृष्ठे...)

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्रीशंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृतः

सौर १ चैत्र १८९२ २२मार्च १९७०

# शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् ११ अङ्कः १०

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. ०-४०

## सुरभारती-सोमैया-संस्कृत-केन्द्रेषु स्तवनम्

सुखयतु रसिकान् सुभगा सुखदा जयतु सुरसरस्वती सर्वदा ।। ध्रु ।।

व्यासविरचितं महाभारतम् । रामायणमपि वाल्मीकिकृतम् ।।
यस्यां वाण्यां सकलतोषकम् । सैषा भाषा सकलसौख्यदा ।। १ ।।

संस्कृवाणीप्रणयवर्धनम् । पुण्यदं व्रतं गृह्यतामिदम् ।।
व्रतस्य तस्य प्रारम्भोऽयम् । प्रार्थ्यतामियं वरदशारदा ।।२।।

प्रेम वर्धतां संस्कृतेऽधिकम् । भवतु सिद्धये प्रयत्नशतकम् ।।
लभ्येत ततो यशश्चोज्ज्वलम् । घोषयन्तु सोत्साहमेकदा ।। ३ ।।

'कठिनं खलु संस्कृतं' भ्रमोऽयम् । प्रयत्ने कृते यास्यति विलयम् ।।
स्मरन्तु नित्यं 'समर्थ' वचनम् । 'यत्नदेवता' पूज्यतां सदा ।।४।।

यत्प्रेरणया प्रारब्धमिदम् । केन्द्रं 'सुरभारती' वर्धकम् ।।
श्री 'सोमैया' श्रेष्ठिजीवनम् । कुरु सुखपूर्णं सरस्वति सदा ।।५।।

संस्कृतवक्तृत्वोत्तेजनार्थं टिळक-महाराष्ट्र-विद्यापीठद्वारा महाराष्ट्रेषु तथा गोमान्तकप्रदेशे च "सुरभारती-सोमैया-संस्कृत-केन्द्राणि" विंशतिसंख्याकानि प्रस्थाप्यन्ते । संस्कृतप्रसार-संवर्धन-संरक्षणकार्ये क्रियाशीलैः शर्कराकर्मान्तक्षेत्रविख्यातैः उद्योगपतिभिः श्री. करमसी जेठाभाई सोमैयाश्रेष्ठिभिः तथा च तेषां सुपुत्रैः श्री. शान्तिलाल करमसी सोमैया-महोदयैः "सुरभारती-सोमैया संस्कृत-केन्द्रार्थम्" आर्थिकः पुरस्कारः दीयते । धन्यवादार्हाः खलु संस्कृतविद्यानुरागिणः श्री. सोमैयामहानुभावाः यैः ३५००० रूप्यकाधिकं स्वीयम् अनुदानं विद्यापीठ-कार्यार्थं प्रतिवर्षं संकल्पितम् ।

संपादकः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

## तुका म्हणे १६ तुका वक्ति

| तुका म्हणे | | तुका वक्ति |
|---|---|---|
| याचसाठी केला<br>होता अट्टहास ।<br>शेवटचा दिस<br>गोड व्हावा ॥ | १ | अत एव मयाऽकारि<br>व्यापारोऽपार यत्नतः ।<br>मधुरान्तं भवेद् येन<br>ऐहलौकिकजीवनम् ॥ १ |
| आता निश्चितीनें<br>पावलो विसावा ।<br>खुंटलिया धावा<br>तृष्णेचिया ॥ | २ | विश्रान्तिस्थानमासाद्य<br>वीतचिन्तोऽस्मि संप्रति ।<br>ते चोद्दामं प्रसर्पन्तस्<br>तृष्णावेगाः शमं गताः ॥ २ |
| कवतिक वाटे<br>झालिया वेचाचे ।<br>नांव मंगळाचें<br>तेणें गुणें ॥ | ३ | आश्चर्यमिव मे भाति<br>यन् मया मूल्यमर्पितम् ।<br>वर्धयत् हेतुना तेन<br>माङ्गल्य गुणसंपदम् ॥ ३ |
| तुका म्हणे मुक्ति<br>परिणीली नोवरी ।<br>आता दिस चारी<br>खेळीमेळी ॥ | ४ | तुका वक्ति वधूर्मुक्तिः<br>परिणीता सुमङ्गलीः ।<br>अधुना जीवितं शेषं<br>रसवत्-केलि-कोमलम् ॥ ४ |

तुकारामः — डॉ. ग. बा. पळसुले

## बाबा-ताहेर-काव्यम् .... १६

खुदांवदाजें बस ज़ारम् अजीं दिल् । बवद रोज़ाँ दरावाज़म् अजीं दिल् ॥
जे बस नालीदम ज़् नालीदनम् कस् । जें मू बिस्तूं कें बेज़ारम् अजीं दिल् ॥

दुःखी भवामि भगवन् मनसोऽस्य हेतोः ।
क्लिन्दाम्यहं सततमत्र दिवा च रात्रौ ॥
दीनोस्मि दुर्गत इति व्यलपं विभो ! मां ।
को मोचयिष्यति कृती मनसोऽस्य बन्धात् ॥

न्या. गुण्डेराव हरकारे

१८-६-३१० गौळीपुरा
गौळा रामय्या वाडा, हैद्राबाद २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

भुवः अलङ्करणाय दिवम् अलङ्कर्तुं गताय महाभागाय महापुरुषाय –

# पू. गोदावरीमातुः श्रद्धाञ्जलिः।

बहुरत्नायाः वसुन्धरायाः अतिदीप्तिमत् इदं पुरुषरत्नं डॉ. हरिभाऊ पाटसकराः। अचिरादेव पुण्यपत्तने सम्पन्ने गणेशयागे तेषां अमन्दप्रवाहः वाग्मन्दाकिनीविलासः अनुभूतः। अभूत् तदानीं मनसि एतादृशैः एव महाभागैः लब्धजन्मभिः 'वसुन्धरा बहुरत्ना' इति उच्यते, स्तूयते जनैः। अन्यथा अस्मिन् संसारे बहवः भूताः भवन्ति, भविष्यन्ति। लोकसङ्ख्या-मर्यादार्थं नियन्त्रणोपदेशकमपि राष्ट्रं एतेषां अभावात् भृशं दुःखाकुलम्। ते डॉ. हरिभाऊ पाटसकरमहाशयाः दिवंगताः इति श्रुता वार्ता अनुभूतं च महद्दुःखम् स्मारं स्मारं तेषां गुणसमुदायम्।

"सर्वैः सर्वाभिः च आत्मनः नामसदृश-गुणार्जने यत्नः विधेयः" इति श्रीसद्गुरुउपासनीमहाराजाः अवदन् प्रवचनप्रसङ्गे। तद्वचनं सार्थं सम्पन्नं हरिभाऊ पाटसकराणां जीवने। हरति सर्वेषां दुःखं अज्ञाननिवारणेन अतः हरिः। ये च महाभागाः विद्यां च अविद्यां च उभयं विदुः, उद्यमबन्धोः सहवासकरणं उपदिदिशुः '-क्षणशः कणशः च विद्यां अर्थं साधयेत्-' इति विद्यया सह अर्थोपार्जनाय उद्यमस्य उद्योगस्य अपि माहात्म्यं अवदन्। भाऊ-बन्धुः। य स बन्धुर्यो विपन्नानां आपदुद्धरणक्षमः। एते यथार्थतया बन्धवः सर्वेषाम्। अप्रियस्य अपि पथ्यस्य स्पष्टतया दुर्लभाः वक्तारः।

विद्यापीठ-कुलपतिपदं अपि पुरुषरत्नैः सुभूषितम्-वैदिकवाङ्मयादारभ्य किं आपतितं अद्य कर्तव्यतया जनतायाः तत् जानन्ति, वदन्ति च ते। यैः स्वयमेव स्वीयं सम्यक् स्मारकं यावज्जीवं कार्यकरैः कार्यद्वारा विरचितम्। क्वचित् भाति 'अल्पस्य हेतोः बहु हातुं इच्छन्ति" एते जनाः असह्यं अदृश्यं इदं 'यस्य राष्ट्रस्य संस्कृतिः उपदिशति 'समानमस्तु वो मनः' इति तद्राष्ट्रवास्तव्याः परस्परं कलहायमानाः। गृह्णन्तु जनाः वचनं तेषां हितोपदेशात्मकं वचनं, समाचरन्तु श्रद्धया सा एव सत्या श्रद्धाञ्जलिः। तदेव श्राद्धं तोषयेत्। दद्यात् शान्तिं तेषां आत्मने।

अस्तु सादरं श्रद्धाञ्जलि-समर्पणं तच्चरणयोः। विद्यानिधेः गणेशस्य यागात्मिकायाम् आराधनायां लब्धः तेषां सुविद्या-प्रसादः प्रसन्नताप्रदः।

श्री पू. गोदावरीमातुः सन्देश-वशात्—

सतीकन्याकुमारीस्थान
साकुरी (नगर-महाराष्ट्र)

सुभद्रा उपासनी महाराज

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

## तुका म्हणे १६ तुका वक्ति

याचसाठी केला
होता अट्टहास ।
शेवटचा दिस
गोड व्हावा ॥ १

आता निश्चितीनें
पावलो विसावा ।
खुंटलिया धावा
तृष्णेचिया ॥ २

कवतिक वाटे
झालिया वेचाचे ।
नांव मंगळाचें
तेणें गुणें ॥ ३

तुका म्हणे मुक्ति
परिणीली नोवरी ।
आता दिस चारी
खेळीमेळी ॥ ४

तुकारामः

अत एव मयाऽकारि
व्यापारोऽपार यत्नतः ।
मधुरान्तं भवेद् येन
ऐहलौकिकजीवनम् ॥ १

विश्रान्तिस्थानमासाद्य
वीतचिन्तोऽस्मि संप्रति ।
ते चोद्दामं प्रसर्पन्तस्
तृष्णावेगाः शमं गताः ॥ २

आश्चर्यमिव मे भाति
यन् मया मूल्यमर्पितम् ।
वर्धयत् हेतुना तेन
माङ्गल्य गुणसंपदम् ॥ ३

तुका वक्ति वधूर्मुक्तिः
परिणीता सुमङ्गलीः ।
अधुना जीवितं शेषं
रसवत्-केलि-कोमलम् ॥ ४

— डॉ. ग. बा. पळसुले

० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ० ०

## बाबा-ताहेर-काव्यम्.... १६

खुदांवदाजे ँ बस ज़ारम् अजी ँ दिल् । बवद रोज़ाँ दरावाज़म् अजी ँ दिल् ॥
जे बस नालीदम ज़ नालीदनम् कस् । जे ँ मू बिस्तू ँ के ँ बेज़ारम् अजी ँ दिल् ॥

दुःखी भवामि भगवन् मनसोऽस्य हेतोः ।
क्लिन्दाम्यहं सततमत्र दिवा च रात्रौ ॥
दीनोस्मि दुर्गत इति व्यलपं विभो ! मां ।
को मोचयिष्यति कृती मनसोऽस्य बन्धात् ॥

न्या. गुण्डेराव हरकारे

१८-६-३१० गौळीपुरा
गौळा रामय्या वाडा, हैद्राबाद २

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

भुवः अलङ्करणाय दिवम् अलङ्कर्तुं गताय महाभागाय महापुरुषाय –

# पू. गोदावरीमातुः श्रद्धाञ्जलिः ।

बहुरत्नायाः वसुन्धरायाः अतिदीप्तिमत् इदं पुरुषरत्नं डॉ. हरिभाऊ पाटसकराः। अचिरादेव पुण्यपत्तने सम्पन्ने गणेशयागे तेषां अमन्दप्रवाहः वाग्मन्दाकिनीविलासः अनुभूतः । अभूत् तदानीं मनसि एतादृशैः एव महाभागैः लब्धजन्मभिः 'वसुन्धरा बहुरत्ना' इति उच्यते, स्तूयते जनैः। अन्यथा अस्मिन् संसारे बहवः भूताः भवन्ति, भविष्यन्ति । लोकसङ्ख्या-मर्यादार्थं नियन्त्रणोपदेशकमपि राष्ट्रं एतेषां अभावात् भृशं दुःखाकुलम् । ते डॉ. हरिभाऊ पाटसकरमहाशयाः दिवंगताः इति श्रुता वार्ता अनुभूतं च महद्दुःखम् स्मारं स्मारं तेषां गुणसमुदायम् ।

"सर्वैः सर्वाभिः च आत्मनः नामसदृश-गुणार्जने यत्नः विधेयः" इति श्रीसद्गुरुउपासनीमहाराजाः अवदन् प्रवचनप्रसङ्गे । तद्वचनं सार्थं सम्पन्नं हरिभाऊ पाटसकराणां जीवने । हरति सर्वेषां दुःखं अज्ञाननिवारणेन अतः हरिः । ये च महाभागाः विद्यां च अविद्यां च उभयं विदुः, उद्यमबन्धोः सहवासकरणं उपदिदिशुः '-क्षणशः कणशः च विद्यां अर्थं साधयेत्-' इति विद्यया सह अर्थोपार्जनाय उद्यमस्य उद्योगस्य अपि माहात्म्यं अवदन् । भाऊ-बन्धुः । य स बन्धुर्यो विपन्नानां आपदुद्धरणक्षमः । एते यथार्थतया बन्धवः सर्वेषाम् । अप्रियस्य अपि पथ्यस्य स्पष्टतया दुर्लभाः वक्तारः ।

विद्यापीठ-कुलपतिपदं अपि पुरुषरत्नैः सुभूषितम्-वैदिकवाङ्मयादारभ्य किं आपतितं अद्य कर्तव्यतया जनतायाः तत् जानन्ति, वदन्ति च ते । यैः स्वयमेव स्वीयं सम्यक् स्मारकं यावज्जीवं कार्यकरैः कार्यद्वारा विरचितम् । क्वचित् भाति 'अल्पस्य हेतोः बहु हातुं इच्छन्ति" एते जनाः असह्यं अदृश्यं इदं 'यस्य राष्ट्रस्य संस्कृतिः उपदिशति 'समानमस्तु वो मनः' इति तद्राष्ट्रवास्तव्याः परस्परं कलहायमानाः । गृह्णन्तु जनाः वचनं तेषां हितोपदेशात्मकं वचनं, समाचरन्तु श्रद्धया सा एव सत्या श्रद्धाञ्जलिः । तदेव श्राद्धं तोषयेत् । दद्यात् शान्तिं तेषां आत्मने ।

अस्तु सादरं श्रद्धाञ्जलि-समर्पणं तच्चरणयोः । विद्यानिधेः गणेशस्य यागात्मिकायाम् आराधनायां लब्धः तेषां सुविद्या-प्रसादः प्रसन्नताप्रदः ।

श्री पू. गोदावरीमातुः सन्देश-वशात्—

सतीकन्याकुमारीस्थान
साकुरी (नगर-महाराष्ट्र)

सुभद्रा उपासनी महाराज

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# बालकानां जवाहरः

लेखकः– विघ्नहरिः देवः

मूल्यम् ६४ पणकाः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# अष्टमी निखिल-भारतीय-संस्कृत-प्रतियोगिता

भारतशासनस्य शिक्षामन्त्रालयद्वारा प्रतिसंवत्सरं संस्कृतस्य प्राचीनया प्रणाल्या यत्र अध्यापनं प्रचाल्यते तासु संस्थासु अध्ययनपराणां छात्राणां संस्कृतवक्तृत्वादिषु प्रतियोगिता आयोजिता भवति। प्रस्तुतसंवत्सरे सा प्रतियोगिता दिल्लीनगरे १९७० जानेवारी मासस्य २४, २५ दिनाङ्कयोः आयोजिताऽभूत् ।

प्रतिप्रदेशं षट् स्पर्धकाः छात्राः एकश्च तेषां विषयोपदेष्टा शिक्षकः इति आहत्य सप्तानां संघः तत्रोपस्थातुमर्हः। षट्सु न्याय-व्याकरण-वेदान्त-मीमांसा-सांख्य-साहित्य-इत्येतेषु शास्त्रेषु प्रतिशास्त्रम् एकः उपन्यास-विषयः स्पर्धाप्रारम्भसमयात् पूर्वं चतुर्विंशति-होराः प्रसिद्धीक्रियते। अन्त्याक्षरीस्पर्धा समस्यापूर्ति-स्पर्धा चेति द्वौ स्वतन्त्रौ स्पर्धा-विभागौ इति आहत्य अष्टौ स्पर्धाविभागाः भवन्ति। कोऽपि स्पर्धकः षट्सु शास्त्र-विभागेषु द्वयोः विभागयोः अन्त्याक्षर्यां समस्यापूर्तौ चेति चतुर्षु विभागेषु स्पर्धाभागभाग् भवितुमर्हति। प्रतिस्पर्धाविभागं त्रीणि पारितोषिकाणि गुणक्रमानुसारं वितीर्यन्ते। तत्र गुणतः प्रथमो विजेता पादोनशतद्वयं (१७५।–) रूप्यकान्, महाकारं रजतवर्णं चषकं, द्वितीयः पादोनशतं (७५।—) रूप्यकान्, मध्यमाकारं चषकं, तृतीयः पञ्चाशतं (५०।—) रूप्यकान् अल्पाकारं चषकं च पारितोषिकरूपेण लभते। एवं च अष्टसु स्पर्धाविभागेषु आहत्य चतुर्विंशति पारितोषिकाणि लभन्ते गुणानुसारं स्पर्धकाः छात्राः।

अस्मिन् संवत्सरे संजातासु प्रतियोगितासु भारतस्य दशभ्यः प्रदेशेभ्यः पञ्चाशत्संख्याकाः छात्राः स्पर्धकरूपेण उपस्थिता आसन्। जानेवारीमासस्य त्रयोविंशे दिनाङ्के शुक्रवासरे प्रातः दशवादनावसरे शास्त्रोपन्यासप्रतियोगिताविषयाः प्रसिद्धिं नीताः। ते च यथा-साहित्ये-शान्तोऽपि नवमो रसः, व्याकरणे-कृत्तद्धितसमासाश्च, न्याये-अनुमानस्वरूपम्, वेदान्ते-लोकवत्तु लीलाकैवल्यम्, सांख्ये–पुरुषबहुत्वम्, मीमांसायाम्—मन्त्रा अनर्थकाः सार्थका वा।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

चतुर्विंशतितमे दिने मन्दवासरे प्रातः दशवादनावसरे जनपथे राष्ट्रिय-संग्रहालये समारोहेण महता प्रतियोगितानाम् उद्घाटनमभूत्। भारतशासनस्य शिक्षाविभागराज्यमन्त्रिणः श्रीभक्तदर्शनमहाभागाः उद्घाटनस्योपन्यासमकुर्वन्। तदा संस्कृतभाषाविषये तैः स्वीयोऽभिप्रायः हिन्दीभाषायां प्रकटीकृतः। स च यथा-'यद्यपि वस्तुसंग्रहालये अयं समारोहः आयोजितोऽस्ति तथापि संस्कृतभाषेयं वस्तुसंग्रहालये न वर्तताम्। सा सर्वत्र भारते अन्येष्वपि देशेषु विस्तरं लभताम्। बहूनां भाषाणाम् अध्ययनेन छात्राणां बुद्धिः शक्तिः समयश्चापि तत्रैव महान्तं व्ययं गच्छति। गणितविज्ञानादिषु नितरामावश्यकेषु विषयान्तरेषु तेन छात्राणां प्रगतिः दुःशका भवति। अतः अध्येतव्ये विषयभारे भाषाभार-यथा न्यूनो भवेत्तथा प्रयतितव्यम् इति बहवः शिक्षाविचक्षणाः प्रतिपादयन्ति। तद् अङ्गीकृत्यापि संस्कृताध्ययनस्य विशिष्टां मर्यादां यावत् अपरिहार्यत्वमेवाभ्युपेतव्यम्। अपि च भाषाध्यापनस्य या नूतना शास्त्रीया प्रणाली परिनिष्ठापितास्ति, तया प्रणाल्या अल्पीयसा समयेन प्रयत्नेन च बहूनां परस्परं नितरां विभिन्नानामपि भाषाणाम् अध्ययनं सुकरं सुफलं च संपाद्यते। संस्कृतभाषा तावद् भारतीयभाषाभ्यः न नितरां विभिन्ना प्रत्युत रचना-शब्दसंपत्ति-गुणालंकारादिभिः संनिकृष्टा एव। अतः तस्याः नूतनया पद्धत्या प्रसारे अतीव सुकरता उपयोगितापि नितरां स्यादिति भारतशासनं तद्विषये द्रढीयः प्रयत्नशीलम्। प्रदेशशासनानि अपि अत्र विषये तद्वदेव प्रयत्नपराणि प्रवर्तेरन् इति आशास्ते।' उद्घाटनसमारोहस्यावसरे तत्रैव राष्ट्रिय-संग्रहालये अन्त्याक्षरी स्पर्धा प्रस्तुता। स्वल्पेन समयेन तत्र स्थगितीकृता अन्त्याक्षरीस्पर्धा पुनः लालबहादुरशास्त्री-संस्कृत-विद्यापीठे प्रक्रान्ता। तत्रैव यथाक्रमम् अन्याः शास्त्रोपन्यासस्पर्धाः समस्यापूर्तिस्पर्धा च द्वयोः दिनयोः समाप्तिमगमन्। समस्यापूर्तिस्पर्धायाः समस्या आसीत् 'मुञ्चतीवाश्रुजालम्'।

**किमहो एभिः (मद्य–) चषकैः छात्राणाम् ?**

भानुवासरे सायं यशस्विभ्यः स्पर्धकेभ्यः पारितोषिकवितरणं दिल्ली-प्रदेश-राज्यपालानां श्रीमताम् आदित्यनाथ-झामहोदयानाम् शुभेन

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

हस्तेन समभूत् । तदा धारावर्षं वर्षत्सु मेघेषु समारोहोऽयं पटगृहे महान्तं संभ्रममजनयत् । तस्मिन् संभ्रमे पारितोषिकचषकाः त्रिधा विभक्ताः प्रायः पङ्किलायां भूमौ निपातमापन्नाः महत्तरं संभ्रमं हासं चापि अवर्धयन् । तान् पारितोषिकरूपेण प्रदत्तान् पाश्चात्यसंस्कृतिप्रदर्शकान्(मद्यस्येव) चषकान् इतस्ततो विप्रकीर्णान् दृष्ट्वा नैके विद्वांसः अपवार्य कर्णयोः मिथः अजपन् 'किमहो एभिः (मद्य-) चषकैः छात्राणाम् ? नान्यत् किमपि भारतीयायां परम्परायाम् औचित्यमावहत् पारितोषिकं सरस्वती-प्रतिमादिरूपं सुशकम् ! सर्वथा औचित्यभङ्ग एवायं चषकपारितोषिकं नाम' इत्यादि । प्रतियोगितार्थं संप्राप्तेषु दशसु प्रदेशसंघेषु उत्तरप्रदेशसंघेन सर्वेभ्यः अधिका गुणा लब्धाः अतः अस्थायि-जय-चिह्नम् (शील्ड) उत्तर-प्रदेशेन विजितम् ।

**महाराष्ट्र-यशः.... पारितोषिकचतुष्टयम्**

महाराष्ट्रराज्यस्य शिक्षणविभागेन पुणे-नगरीय-श्रीबालमुकुन्द-संस्कृत-महा-विद्यालये संस्कृताध्ययनपराः षट् छात्राः तस्य विद्यालयस्या-धिपतिः स्पर्धकसंघस्य मार्गदर्शक इति प्रेषिता आसन् । तेषु कु. प्रतिभा गोखले मीमांसायां प्राथम्यम्, श्री. राम डिबळे-समस्यापूर्तौ प्राथम्यम्, श्री. माधव पित्रे–समस्यापूर्तौ द्वितीयं क्रमं, कु. विनया भागवत–साहित्ये तृतीयं क्रमम् इति चत्वारि पारितोषिकाणि महाराष्ट्र-राज्य-संघेन संप्राप्तानि । तत्र समस्यापूर्तौ यथागुणानुक्रमं द्वे पूर्ती पुरतो दीयेते–

१) श्री. राम डिम्बळे–

> दिल्लीग्रामे शीतमत्यन्तमेव, भानुस्तस्मान्निष्प्रभस्तत्र जातः ।
> चण्डांशुर्यो जात एवं हिमांशुः, प्रातस्तस्मान्मुञ्चतीवाश्रुजालम् ॥

२) श्री. माधव पित्रे–

> मलयगिरि-सुदेशाद् आगतो गन्धवाहः
> तव सदननिवासो युज्यते किं ममाद्य ।
> पवन, नहि नहीत्थं भाषमाणा लतेयं
> मधुरमण-वियोगात् मुञ्चतीवाश्रुजालम् ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

**किञ्चिदत्र अवधानमवश्यं दीयताम् प्रतियोगिता-संयोजकैः !**

उपक्रमोऽयं छात्राणां महते श्रेयसे इत्यत्र न मनागपि संदेहावसरः। भिन्नविभिन्नेभ्यः प्रदेशेभ्यः संस्कृतछात्राः अध्यापकाश्चापि मिषेणानेन संगच्छन्ते, संवदन्ते, परस्परं मनांसि संजानते च। संकुचिता बुद्धिः विस्तारं लभते। परं प्रतियोगितानामेतासां यावती प्रसिद्धिः वृत्तपत्रादिद्वारा, स्वातन्त्र्येण वा कर्तुमुचिता शक्या च तावती न भवति। तेन सर्वेभ्यः राज्येभ्यः अपेक्षितया संख्यया स्पर्धकाः नोपतिष्ठन्ते। प्रतियोगितानाम् इतिवृत्तं प्रथमक्रमाङ्कस्पर्धकानां छायाचित्रादिसहितं समस्यापूर्तिसनाथं प्रसिद्धीकृत्य तासु तासु संस्कृतपाठशालादिसंस्थासु यदि प्रेषितम् तर्हि नवनवाः छात्राः तत्पठनेन महान्तमुत्साहं लभेरन्। नेदं विस्मर्तव्यं यत् 'अभिनन्दनं कौतुकं वा छात्राणां जीवातुभूतम्' इति, तदभिनन्दनं यदि एवं प्रसिद्धिम् आपन्नं स्यात्तदा बहुगुणितमुत्साहं ते विन्देरन्। अवरतः यानि संस्कृतनियतकालिकानि सांप्रतं तत्र तत्र प्रदेशेषु प्रसिद्धीक्रियन्ते तैः तैः संस्कृतप्रचारपरैः श्रद्धावद्भिः संपादकैः, तेऽपि इदम् इतिवृत्तं महत्या कर्तव्यभावनया प्रसिद्धीकुर्युः यदि ते शासनेन विज्ञापिताः स्युः। पारितोषिकाणि अपि सांप्रतिकं सर्वत्र रूढं परं पाश्चात्यसंस्कृति-प्रतीकरूपं चषकाकारं परित्यज्य भारतीयामुचितां परंपरां छात्रोपयोगं चानुसृत्य योग्यतममाकारं विन्देरन् तदा कस्य भारतीयसंस्कृत्यां श्रद्धावतः विद्यादरवतः मानसं न समुल्लासयेयुः। अन्यदपि किंचित् अवश्यं संसूचनीयमनुष्ठेयं चात्र विषये येन उपक्रमोऽयं शुक्लेन्दुरिव मोदाय बोधाय च कल्पेततराम्। परमधुना एतावदेव विनम्रभावेन संसूच्य विरम्यते।

न. दिल्ली शारदा-विशेष-प्रतिनिधिः।

स्मर्यताम् ! स्मर्यताम् ! स्मर्यताम् !

**शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् ३०**

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

## कलकत्ता-" महाराष्ट्र-निवासे " भौमभूषिता चतुर्थी

स खलु सकलः सुमङ्गलो वासरः। सत्यम् एव सुमङ्गलः। यतः सा आश्विनमासस्य कृष्णचतुर्थी आसीत्। मङ्गलवासरश्च। तेन सेयं मङ्गलमूर्तेरतिप्रिया किल तिथिः। अस्याम् एव तिथौ अतिथित्वेन संप्राप्ता आसन् श्रीकालिकाधिष्ठितं कलकत्तानगरं सकलभारतदेशगता नाना-शास्त्र-नदीष्णाः निष्णात-मतयः अनेके प्राच्य-विद्या-विशारदाः पण्डिताः प्राच्य-विद्या-परिषदं लक्ष्यीकृत्य।

विद्यते किल कलकत्तानगरे 'महाराष्ट्र' निवासाख्यं एकं प्रसन्न-रमणीयं स्थानम्। अनेके महाराष्ट्राभिजनाः सज्जनास्तत्र खलु अहर्निशम् अनुतिष्ठन्ति महाराष्ट्रजनताहितावहं विविधं कार्यजातम्। अस्य च महाराष्ट्र-निवासस्य संचालकाः नितरामुत्साहसम्पन्ना आतिथ्यदक्षाः प्रसन्न-वदनाः सन्तः महाराष्ट्रतः केचन विद्याव्रतिनः समयेऽस्मिन्नवश्यम् आगच्छेयुः तेषाम् आतिथ्य-संपादनं नाम महाराष्ट्रनिवासस्य प्रथमं कर्तव्यम् इति धिया महाराष्ट्र-विद्वद्गण-मार्ग-प्रतीक्षण-परा आसन् तस्मिन् भौम-भूषिते चतुर्थीदिने।

व्याहृतं खलु तैः स्वागतं महाराष्ट्रविदुषां महता संरम्भेण। अध्व-श्रमक्लान्ताः महाराष्ट्र-पण्डितास्तथा स्वागतेन स्वाद्वन्नेन च संभाविता यथा ते पुनर्नवीभूताः सन्तः अग्रिमं कार्यकलापं संपादयितुं सुसज्जाः समभवन्।

भोजनोत्तरमासीत् तत्र विदुषां परिषद्। यस्यां किल सर्वेषां परिचयः तथा च स्वं स्वं विषयम् अधिकृत्य मनागिव भाषणम् आसीत्।

अस्यां परिषदि संस्कृतभाषाम् आश्रित्य केनापि विदुषा स्वाभिप्राय आविष्कृतः। वस्तुतस्तु अभिनन्दनार्हम् एतत्। तस्य भाषणेन श्रोतृवृन्दस्य मनांसि मनागिव प्रसन्नानि समभवन्। विदुषां संसदि संस्कृतभाषायां भाषणं नैव औचित्यहानिकरम् इति सत्यम् एव। परं संस्कृतभाषां राष्ट्रैक्यस्य निदानं मन्वानाः साटोपं तथा प्रतिपादयन्तः केचन विद्वांसः दिविषदां भाषां शृण्वन्तोऽपि सन्तः विषण्णा एव निषण्णा आसन् सभायाम् अस्याम्। मन्ये, तेषां मतेन, संस्कृतभाषायां भाषणं

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

नाम '–व्यवस्थितो विषयः'। तत्र तावत् तैरेवं स्वयं संस्कृतभाषायां वक्तव्यम्। तैरेव कृतेन परिहासविजल्पितेन जनैः हास्यरसः अनुभवितव्यः। परमार्थतः हास्यरसार्हं तेषां भाषणं भवतु न वा। न जाने, एषा गुण-विमुखता केषाम् आचार्याणां सकाशात् तैरधीता–इति। अथवा स्वभावोऽयं तेषां प्रकृति-नियतत्वाद् अकृतकः।

तस्यामेव समित्यां अदूष्येण वैदुष्येण संपन्ना काऽपि सीमन्तिनी स्वाभिप्रायं प्रकटयामास। सा अवादीत्–"यदा काऽपि व्यक्तिः चिरपरिचितापि परकीये देशे साक्षात् क्रियते, तदा वाङ्मनसयोः अगोचरः कोऽपि भवति महान् आनन्दसन्दोहः। मन्ये नात्र लेशतोऽपि संशयः परं महाराष्ट्र-वास्तव्येन संस्कृतभाषाभिज्ञेन, नितरां निकटे उपविष्टेन पुरुषेण साकं बुद्धिपूर्वकं, नियमेन भाषणं परिहरन्तोऽपि महाराष्ट्र-पण्डिता अपि अत्र दृष्टिपथम् अवतीर्णाः। तदिदं संस्कृतभाषाया **ऐक्य-साधन-सामर्थ्यम्**!!" रात्रौ १० वादनसमये समाप्तेयं विद्वत्सभा। ततः सभाजिताः सर्वे विपश्चितः पुष्पमाला-ताम्बूल-समर्पणेन महाराष्ट्रनिवासाध्यक्षैः। अनन्तरं भूयोऽपि सर्वेऽपि पण्डिताः यथाभिलषितं स्थानं स्वकीयैः यानैः प्रापिताः महाराष्ट्र-निवाससंचालकैः इत्यहो आदर्शभूतम् आतिथ्यम्। एवमङ्गारकाङ्गीकृता सा चतुर्थी अनेन आतिथ्यसंरम्भेण अद्वितीया संवृत्ता।

नेदम् आतिथ्यं विस्मरणसरणिं यास्यति महाराष्ट्रपण्डितानां हृदयात् सुचिरेणापि कालेन। अनेन आतिथ्यातिशयेन नितान्तं सुप्रीणिता महाराष्ट्र-पण्डित-मण्डली महान्तम् उत्कर्षं चिन्तयति महाराष्ट्रनिवास-संचालकानां प्रार्थयते च तथा भगवन्तं महागणपतिम्।

विदुषां विधेयः

७०० सदाशिव, पुण्यपत्तनम् ३०		**–श्री. ल. आठलेकर**

* * * * * * * * * * * * * * * * * * * * * * * * * * *

**आज्ञाभङ्गो नरेन्द्राणां विप्राणां मानखण्डनम्।**
**पृथक्शय्या च नारीणाम् अशस्त्रवध उच्यते॥**

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# सामाजिक-सुधारणा-विषये गान्धीजी-मतानि

'अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्' इति कालिदासो वक्ति। अत्र 'महात्मनाम्' इति सामान्येन विधानमस्ति। तत्र ईषत् परिवर्तनं कृत्वां 'महात्मनः' इति संज्ञायां विशिष्यविधानमपि कर्तुं शक्यम्। तद्धि महात्म-गान्धि-विषये चरितार्थमेव स्यात्। अयं तु विशेषः यत् गान्धीजीनां तत्त्वज्ञानविषये न केवलं मन्दाः, प्रत्युत पण्डिता अपि संभ्रान्ता इव दृश्यन्ते। सामाजिक संबन्धविषये गान्धीजीनां विचाराः कीदृशा आसन्? किं ते पुराणमतानुयायिनः आसन्, उत परिवर्तन-वादिनः?

अत्र उच्यते। केनचिद् अर्थेन म. गान्धीमहोदयाः सनातनिनामपि सनातनिनः आसन्, अन्यतश्च सुधारकाणामपि सुधारकाः। वैष्णवकुले गृहीतजन्मानस्ते प्रकृत्यैव परमधार्मिका आसन्। स्वभावतश्च आस्तिकाः। सर्वेषां रोगाणां रामनामैव औषधोत्तमम्, 'वैद्यो नारायणो हरिः' इत्यासीत् तेषां विश्वासः। 'अस्मिन्नेव जन्मनि मोक्षम् अनुभवितुम् उत्सुकोऽस्मि' इति ते लिखन्ति। न सहन्ते स्म ते अत्र प्रसृतां पाश्चात्यां संस्कृतिम्। ते यन्त्रं शापमेव अमन्यन्त। नारोचयन्त डॉक्टर-वाक्कीलादिकान्। व्यरुन्धन् रेलयानम्। नान्वमन्यन्त स्त्रीणां धनोपार्जनार्थं सेवाकरणम्। यत्सत्यम्, सुधारणाख्यां सर्वामेव पाचात्यसंस्कृतिं तस्याः भौतिक-प्रधानत्वात्, धर्म-विमुखत्वाच्च 'सुधारणा-चाण्डालिका' इति वदन्ति स्म। किम् अपेक्ष्यते अतः परं सनातनित्वस्य प्रमाणम्?

अन्यतस्तु ते सुधारका आसन् इत्यपि शक्यते वक्तुम्। अस्पृश्यता-विषयकाणि तेषां मतानि सर्वविदितान्येव सन्ति। न केवलं ते अस्पृश्यतां हिन्दुधर्मस्य कलङ्कम् अमन्यन्त; अस्पृश्यानां हिन्दुसमाजात् पृथक्करण-विरोधार्थं तैः प्रायोपवेशनमपि कृतम्। तेषां हरिजन इति नूतनं नाम कृतम्। कस् तथाकथितः सनातनी इदं कुर्यात्? स्त्रीणां सेवावृत्तिर् यदि तैर् निषिद्धा, तर्हि तत् तासां गौरवरक्षणार्थम्; न चतुर्भित्ति-बन्दीकरणा-र्थम्। स्त्री गृहस्य सम्राज्ञी अस्ति इति ते अमन्यन्त। स्त्रीणाम् राजकीयेषु आन्दोलनेषु सहभागीभवनं तैर् न केवलं न विरुद्धम्, प्रत्युत प्रोत्साहित-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मपि । यत्सत्यम् गान्धीयुगे एव स्त्रीभिः इदं स्वातन्त्र्यं लब्धम् । ते नारीत्व-पूजका आसन् । 'युष्माकं यानि पापानि, तानि वस्तुतः अस्माकं पापानि' इति गान्धीजीभिः बारीसाले वेश्याः उद्दिश्य उक्तम् । कांचित् वेश्यां दृष्ट्वा तस्यामपि जगन्मातरं साक्षात्कृत्य पूज्यपादाः रामकृष्ण-परमहंसाः ताम् प्राणमन् इत्याख्यायते । न तस्मात् अति भिद्यते गान्धीचरितम् । बाल-विवाहः, केशवपनम्, मेष-महिषादीनां देवतापुरतः बलिदानम् इत्यादयो रूढयः तेषां संमता नासन् इति नावश्यकं वक्तुम् । 'सर्वम् इदं परिवर्तनीयम् । किं तु अपरित्यज्य अस्माकं धर्मम् । यथा बालः निजं मातरं दृढमाश्लिष्य तिष्ठति, एवम् अस्माभिरपि निजां संस्कृतिम् आश्लिष्य स्थातव्यम्' इति ते वदन्ति स्म ।

आधुनिक-भारतस्य टिळकपर्वणि अयं प्रश्नः पुनः पुनर् उदतिष्ठत्—राजकीया प्रगतिः पूर्वम्, उत सामाजिकी ? गान्धीजीविषयेऽपि इदं प्रष्टुं शक्यम् । ते के आसन् ? प्राधान्येन राजकीयनेतारः, उत सामाजिक नेतारः ? अपि च । किं ते व्यक्तिवादिनः आसन्, उत समाजवादिनः ? अत्रापि, यथा ते युगपत् सनातनिनोऽपि आसन् सुधारका अपि; एवं ते राजकीय नेतारोऽपि आसन्, सामाजिक नेतारोऽपि । व्यक्तिवादिनोऽप्यासन्, समाजवादिनोऽपि । अस्य अयमेव अर्थः यत् ते एताः सर्वाः संज्ञाः अतीत्य अतिष्ठन् । न गान्धीजीनां व्यक्तिमत्वम् एताभिः रूढाभिः संज्ञाभिः बद्धुं शक्यते । अन्यैव आसीत् इयं मूषिका ।

कोऽयं मूषिका-भेदः ? अन्येषां लोकनायकानां गान्धीजीनां च कीदृशः अन्योन्य-भेदः ? उच्यते । ये राजकीय-नेतारः आसन् तेषां राष्ट्र-स्वातन्त्र्यप्राप्तिः उद्दिष्टमासीत् । ये सामाजिक-नेतारः तेषां समाजपरि-वर्तनम् उद्दिष्टम् । गान्धीजीनां राष्ट्रस्वातन्त्र्यम् ईप्सितमासीत्, किं तु न तदेव । समाज-परिवर्तनमपि ईप्सितमासीत् किं तु न तदेव । किं तर्हि तेषां ध्येयमासीत् ? सकल.मानव-समाजस्य शुद्धीकरणम् । प्रेमसाम्राज्यस्थाप-नम् । विश्व-बन्धुत्व-निर्माणम् । यतः भारतोपरि आङ्ग्लसाम्राज्यम् तेषां ध्येयसिद्धौ विघ्नभूतमासीत्, अतः तैः तद्विरोधार्थं राजकीयम् आन्दोलनं कृतम् । अत एव तेषां अस्पृश्यताविरोधादीनि सामाजिकानि आन्दोलनानि । अन्येषां नेतृवराणां ध्येयानि तत्तद्-देशकाल-सापेक्षाणि आसन्; गान्धी-

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

जीनां तु ध्येयम् देशकालातीतम् आसीत्, शाश्वतमासीत्। तेनांशेन ते सन्तानाम् संनिकृष्टतराः सन्ति।

गान्धीवादस्य अयमेकः अंशः तेषां सन्तसादृश्यम्, इतरनेतृभिश्च वैसादृश्यं प्रकटयति। अन्ये हि सामाजिकनेतारः प्राधान्येन सामाजिकसंस्थानां परिवर्तनम् इच्छन्ति। प्रस्थापिता समाजरचना व्यक्तिविकासे विघ्नकरी इति कृत्वा तत्र क्रान्तिमिच्छन्ति। ते भौतिकपरिस्थितेः परिवर्तनेन तुष्यन्ति। न व्यक्तेः संस्कारम् आगृह्णन्ति। गान्धीमहोदयास्तु प्राथम्येन प्राधान्येन च व्यक्तेः संस्कारम् इच्छन्ति। एकैकस्यां व्यक्तौ संस्कृतायाम् अनायासेनैव समाजसंस्करणं स्यादिति तेषां मतम्। किं च या सद्गुणबहुला नीतिसंपन्ना च, सैव यथार्था शाश्वती च समाजप्रगतिः न केवलं भौतिकी शारीरसुखप्रधाना च इति ते मन्यन्ते स्म, यथा सर्वे सन्ताः। किं च यत्किंचित् समाजरचनायां परिवर्तनम्, क्रान्तिर्वा, तदिदम् अहिंसयैव भवतु इत्यपि तेषाम् आग्रहः।

अयं त्वेकः सन्तेभ्यो गान्धीजीनां भेदः। सामाजिके अपुण्यविषये उपेक्षाभावनातः परितुष्यन्ति पारम्परिकाः सन्ताः। गान्धीवादस्तु अशुद्धिपङ्किले समाजे एकस्याः व्यक्तेः शुद्धिं अशक्याम् मन्यते। न च स्वयम् अशुद्धा व्यक्तिः समाजम् उद्धर्तुं पारयति। अतः गान्धीवादे व्यक्त्युद्धारः समाजोद्धारश्च इत्येतौ अन्योन्यपूरकौ भवतः, एकरूपौ भवतः।

यतिधर्मप्रतिपादनं न गान्धीजीनां वैशिष्ट्यम्। सर्वैर् धर्मैः तत् क्रियते। तेषां समाजधर्मे विस्तारणं तु गान्धीवादविशेषः। तत् कियत् फलितम् कदाचित् कतिपयैर् वर्षशतकैर् अस्य प्रश्नस्य उत्तरं दातुं शक्यम्। अत्रान्तरे सर्वभक्षकयोर् महायुद्धयोर् नग्ननृत्येन भयभीतं पाश्चात्यं जगत् तु गान्धीजीनां हृदयपरिवर्तनप्रधानं सत्याग्रहतन्त्रं प्रति आशया दत्तचक्षुर् वर्तते। य इमां विचारज्वालां प्रज्वाल्य गतः 'स महात्मा सुदुर्लभः'।

५९३ सदाशिव, पुण्यपत्तनम् ३० डॉ. ग. बा. पळसुले

(आकाशवाणी-सौजन्यतः)

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# आयुर्वेद-रसशाला-दादर-शाखारम्भः

मुम्बापुरी दि. १ मार्च ७०  (शारदा विशेष-प्रतिनिधितः)

आयुर्वेद-रसशाला-कर्मान्तस्य दादर विभागे उद्घाटितस्य 'अनन्त स्टोअर्स शाखा' इति पञ्चदश-विक्रय-केन्द्रस्य शुभारम्भः श्रीमान् बाबासाहेब करन्दीकर इत्येतेषां शुभकरकमलाभ्यां ससमारोहं संपन्नः। अनेन केन्द्रेण दादर-विभागस्थ-आयुर्वेदौषधि-क्रयेच्छु-ग्राहकवर्गस्य महती सुविधा संजाता। अस्मिन् मङ्गलक्षणे वैद्यकक्षेत्रस्थाः वैद्य श्री-अन्तरकर-भास्करराव साण्डू-वेणीमाधवशास्त्री जोशी-म. पु. नानल-ना. ह. जोशी वैद्यराजप्रभृतयः समुपस्थिताः।

आयुर्वेद-रसशाला-कार्यवाहैः वैद्य श्री. आ. माण्डकेमहोदयैः विहिते सुस्वागते समारम्भाध्यक्षैः श्रीमान् बाबासाहेब करन्दीकर इत्येतैः क्षौमपट्टिकाकर्तनेन प्रवेशारम्भः कृतः।

रसशाला-निर्माणभाग-प्रमुखैः वैद्य ग. शं. नानल इत्येतैः पठिताः शुभसंदेशाः विविध-संस्था-व्यक्ति-विशेषैः प्रेषिताः।

राष्ट्रिय-शिक्षण-मण्डल-( पुण्यपत्तनम् )-कार्यवाहैः वैद्य कृ. वा. कुलकर्णीमहोदयैः संस्थाकार्यस्य संक्षिप्ते इतिवृत्ते श्राविते आयुर्वेदभीष्माचार्यैः वैद्य जोशी वेणीमाधवशास्त्रिभिः आयुर्वेद-विद्यालयानां निर्माणं संसूचितं स्वीये भाषणे। विद्यालय-छात्राः रसशाला-प्रचारकत्वेन औषधि-प्रसारं कुर्वन्ति। अस्मिन् विभागे शाखाम् उद्घाटच 'रसशाला' संस्थाया अस्मादृश-वैद्यानां सौकर्यं संपादितं, यदर्थं दीयते मया धन्यवादाः प्रार्थ्यते च भगवान् संस्थायाः शाखायाश्च उद्घाटनार्थम्" इत्यपि कथितं तैः।

तृतीय-पञ्चवार्षिक-योजनाकाले आयुर्वेदीयौषधिनिर्माणे कोटयवधि-रूप्यकवृद्धिः संजाता। न केवलं स्वदेशे परदेशे अपि आयुर्वेदौषधिविषये जनानाम् अपेक्षा वर्धिष्णुतां गच्छति। स्वयमेव जनाः आयुर्वेदम् अनुसरन्ति। इति कथयित्वा आयुर्वेदौषधिनिर्माणे बाधकं किं तत् सम्यक् विनिवेद्य वैद्यराजैः श्री. ना. ह. जोशीमहोदयैः प्रार्थितः स्वीये भाषणे सर्वोत्कर्षः।

रसशाला-समिति-सभासदैः टिळक-आयुर्वेद-महाविद्यालयस्य उपप्राचार्यैः वैद्य मोहनराय शंकर देशपाण्डेमहोदयैः धन्यवादान् वितीर्य कथितम् "इयं पञ्चदशी शाखा रसशालायाः। पञ्चदश-शाखया अनया, संस्था प्रविशति तारुण्यम्। अनेन उत्तरदायित्वे अपि वृद्धिः। अत्रैव प्रारम्भः कर्तृत्वस्य। श्रीमताम् अत्रभवतां सर्वेषाम् आशीर्वचोभिः वयम् एताम् अपेक्षां सर्वेषां पूरयितुं समर्थाः स्याम इति सुदृढं विश्वसिमः।"

* * *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

# नापराद्धं ३० लक्ष-स्त्रीजनैः ।




# मिथ्यावृत्ते विश्वासं मा कुरुत ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मध्यमवर्गस्य आर्थिकयक्षप्रश्नानां समाधानार्थं लघुव्यवसायानां प्रोत्साहनार्थं च शाखापञ्चदशीद्वारा अधिकोषक्षेत्रे प्रयतनशील: एक एव-अद्वितीय: नागरी सहकारी अधिकोष: ।

**जनता सहकारी बँङ्क लि. पुणें २.**

(जनता सहकारी अधिकोष: मर्यादित:)
बाजीराव मार्ग:, पुण्यपत्तनम् २

स्थापना १९४९–
दूरवाणी ५६६४३
५८६३३, ५८८४६

द. शं. जमदग्नि
कार्यकारी संचालक:

अन्नं ब्रह्मेति व्यजानात् । दुग्धम् एव अन्नम् ।
अन्न-ब्रह्म-पूजनार्थं सश्रद्धं बद्धपरिकरा:
सर्वोत्कृष्ट-दुग्धनिर्मित-मिष्टान्न-निर्मातार:

दूरवाणी ) **चितळे वन्धु** ( ५७२०८

१ बाजीराव-मार्ग: २ फडतरे-चतुष्क:, ३ डेक्कन-जिमखाना
पु ण्य प त्त न म्

निवास-भोजन-प्रबन्ध: सर्वोत्कृष्ट: ।
अद्ययावत्-पद्धतिशोभितं भोजनगृहम् ।
मङ्गलकार्याणां भोजनसमारोहस्य च सर्वोत्तमव्यवस्था

**सरदारगृहम्**

१९८ लो. टिळकमार्ग:, क्रॉफर्डमार्केट संमुखम्, मुम्बापुरी २
दूरवाणी क्रमाङ्क: ३१४३३७

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

( ... द्वितीय-मुखपृष्ठात् )

तस्य महात्मनः । परं काचपात्रम् इव भग्नं तत् सपदि रमाराज्ये प्राप्ते । अलम् अधुना रामनामस्मरणेन । का वार्ता तत्र रामराज्यस्य ।

मृच्छकटिकनाटके दर्दुरकः कथयति–'द्यूतं हि नाम पुरुषस्य असिंहासनं राज्यम् ।' आधुनिके भारते अबला-प्राबल्यात् पौरुषं तु स्मृति-मात्रशेषम्। सिंहासनम् इति कल्पना अपि त्याज्या । सिंहासनम् अलं कर्तुं विक्रमार्जितसत्त्वता अपेक्ष्यते । द्यूतार्जितमहामात्यत्वे कुतः तत्-संभवः ।

परम् अस्य परिणामः अपि शासकैः नैव विस्मर्तव्यः । यद् यद् लब्धं द्यूतेनैव तत् तत् नष्टं द्यूतेनैव । -इति सिद्धान्तः । उद्यमेनैव सर्वोत्कर्षः । द्यूतेन तु अन्ततो गत्वा सर्वनाशः । अत एव ऊर्ध्वबाहुः विरौति कवष ऐलूषः ऋग्वेदस्य दशम-मण्डले-'अक्षैर्मा दीव्यः कृषिमित् कृषस्व ।

संपादकः


रूप्यकाः ५०,०००

## लिट्क्विझ् क. ६३ द्वारा जेतव्याः ।

प्रवेशपत्रिकाः रविवासरीयेषु प्रमुखेषु वृत्तपत्रेषु प्रकाश्यन्ते । प्रमुखनगरेषु प्रतिनिधयः सन्ति । स्वीक्रियन्तां तेभ्यः प्राप्तिपत्राणि प्रवेशपत्रिकाः च ।
पत्रेण प्रार्थितं चेत् लिट्क्विझ्-साप्ताहिकं विना मूल्यं प्रेषयामः ।

## लिट्क्विझ् प्रायव्हेट लिमिटेड

अलङ्कारः, बालाराममार्गः, मुम्बापुरी ७

१५ भाषासु १८० प्रतिनिधयः २५५ वृत्तपत्रेषु विज्ञापनम् ।

सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ८=०


CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुण्यपत्तन-नगर-छाटण-कार्यालयाय २५-३-७० दिने समर्पितम्
शारदा - (पुण्यपत्तनम् ३०) ११ : १० ★रजि. क्र. एम्. एच्. ५५७

ग्रामस्थाः सन्तु नगरस्थाः वा भवन्तु ये दुर्बलाः असमर्थाश्च तेषां दारिद्र्य-निर्मूलनार्थं सहकारिक्षेत्रद्वारा वयं सातत्येन प्रयतनशीलाः।

**महाराष्ट्र-राज्य-सहकारी-अधिकोषः मर्यादितः**

(दि महाराष्ट्र स्टेट को ऑपरेटिव्ह बँङ्क लिमिटेड)

केन्द्रकार्यालयः
९ बेंक हाऊस लेन
फोर्ट, मुंबई १

प्रादेशिक-कार्यालयः
महाल, नागपुरम्

भाग-धनं निधिश्च – रु. १५ कोटयधिकम्
सर्वं न्यासधनम् – रु. ७५ कोटयधिकम्
सर्वम् ऋणधनम् – रु. १०६ कोटयधिकम्
सर्वः संचारी निधिः – रु. १४२ कोटयधिकम्

सामान्यातिसामान्यजनस्य सदैव हितचिन्तनपरः
सर्वश्रेष्ठः सहकारी अधिकोषः

शृङ्गेरी'श्री'चरण-कृपा-प्रसादेन मङ्गलीभूतम्
पुण्यपत्तने पुण्यं निवासस्थलम्

**॥ हॉटेल स्वस्ति ॥**

१२३४, आपटे-मार्गः (दूरवाणी ५५५००) पुण्यपत्तनम् ४

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम् – यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् ३०.
प्रकाशनस्थलम्-१. म.म.प्रा.द.वा.पोतदार, ४९८ शनिवार, पुण्यपत्तनम् ३०.
२.–श्री.ल.म.चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः–खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् ३०.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri